श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीहयवदनपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयवदनपञ्चाशत् ॥

आचार्यान् बहुशः प्रणम्य निगमान्तार्यामहादेशिकान्
मान्यं श्रीयतिसार्वभौमम् अनिशं भक्त्या शठारिं क्रमात्।
गोदां रङ्गपतेः गुणैरभिगतः श्रीमत्तुरङ्गाननं
कृष्णं श्रीनवनीतनर्तनपरं वन्दे परं दैवतम् ॥ 1 ॥

नाहं योगिषु कर्मठेषु विवुधेष्वात्मावलोकिष्वहो
नाहं भक्तगणेषु वाग्विलसितेष्वाराधकैकान्तिषु।
नाहं शिष्यसुघोषणैकमुदितेष्वाचार्यवर्गेषु वा
कस्मान्माम् अवृणोर्हयानन विभो त्वत्पूजनार्थं वद ॥ 2 ॥

नाहं त्वच्चरणारविन्दमहिमां जानामि वाचान्निधे
नाहं कोमलफुल्लपूर्णहृदयं जानामि ते शोभनम्।
नाहं चिन्तितुमप्यभीप्सितमितश्शक्नोमि नानामतिः
हेषारावकृपार्द्रदृष्टिकलनात् नाथो ममासि प्रभो ॥ 3 ॥

नाहं कामजयी भवामि न शिवो मे कामना भूयसी
वाप्यारामविहारगेहलतिकारत्नस्थलीमण्डपान्।
कृत्वा त्वां ललनासहस्रसुभगं लीलारसालङ्कृतं
साध्वाराधयितुं हयानन चिरात् मन्मानसं वाञ्छति ॥ 4 ॥

तत्तद्वाञ्छितपूरणे प्रियतमां वाचं वदन्त्यादरात्
भूरिद्रव्यसमर्पणे तु बहुधाचाराधयन्त्यन्वहम्।
पत्नीभ्रातृसुतास्नुषाबुधवरास्सम्बन्धिनः संसृतौ
देव ! त्वं तुलसीदलेन मुदितो मां केवलं पालय ॥ 5 ॥

साधुभ्यः चरणारविन्दयुगलैकान्तिभ्य एव प्रभो
    पूर्णं वित्तमदा व्यधाश्च महितान् वित्तेश्वरांस्तान्मुदा।
चिन्तातीतमहत्वमस्तु भवतः श्रुत्या प्रतीतं परं
    त्वत्पादैकरते हि भूरिकरुणां आधत्स्व मय्यादरात्॥ **6**॥

शास्त्राणां निचयः सुमेरुसदृशः शान्त्यै प्रजानां कृतः
    सङ्घः काल्पनिकाभिमानगतयः प्राज्ञाज्ञसंभेदतः।
वक्तृश्रोतृगणेषु कर्मविधुरेष्वाचारशून्येष्वहो
    शान्तिश्शान्तिरितीह केवलकथारावो हि जेजीयते॥ **7**॥

तुष्टिर्मे परमा कलावघनिधौ व्यामोहसाम्राज्यतः
    भ्रान्तेषु प्रणयालयेषु बहुधा धावत्सु विद्वत्सु च।
कृत्यं वेद्मि न वेद्मि साधुचरितं यत्पादमूलं श्रितः
    श्रीमन्मन्दिरलेपनादिकरणे तुष्टो हयास्यं भजे॥ **8**॥

श्रीमान् नाभिभवस्सदा श्रुतिगणैः श्रीभारतीवल्लभः
    व्यासस्सूत्रपुराणभारतमुखैः नारायणांशो मुनिः।
वेदान्तद्वयसामरस्यकृतिभिः श्रीवेङ्कटेशो गुरुः
    त्वामाराध्य हयास्य ! तृष्टिम् अभजन् क्वाहं कथं वा स्तुवै॥ **9**॥

ज्ञानानन्दमयं श्रिया विलसितं शान्तोदितं मे प्रभुं
    दिव्यानन्तगुणोज्वलं दिविषदां श्रेयःप्रदं शाश्वतम्।
अज्ञो दुःखमयः श्रिया विरहितः शान्त्यादिदूरः खलः
    स्तोतुं वाञ्छति चापलात् मम मनस्त्वां मां क्षमस्वादरात्॥ **10**॥

विश्वासो विपुलस्तथापि विदुषां वृत्त्या मनो मुह्यति
    विश्वव्यापृतवित्तविभ्रमगतौ वेदागमापाश्रये।
चित्तं वित्तगतं गतं च चरितं धर्मो विलीनः प्रभो
    मां दोषैकनिधिं हयास्य कृपया पारं नय त्वत्पदम्॥ **11**॥

प्रायस्त्वद्विमुखाः नयन्ति दिवसान् सौख्यादिभाजो भुवि
त्वत्पादैकरतः श्रमेण सहितः तान् याचते भिक्षुवत्।
पूर्वोपार्जितपुण्यभोग इति वा तज्जन्मवेलेति वा
नष्टं तद्द्वयमित्यहो तव पदे हित्वा क्व यामि प्रभो॥ **12** ॥

केचिन्मां परितो हसन्ति सरणिं जानाति नो जीवितुं
किं देवः स्वयमेव यच्छति मुखे स्वाद्यं च खाद्यं सदा।
भूयस्ते परितो हसन्तु विबुधा जानन्तु मामल्पकं
देव ! त्वच्चरणारविन्दमधुपो जीवामि वागीश्वर॥ **13** ॥

मन्नाथे त्वयि रक्षणैकनिरते लक्ष्मीविशिष्टे सदा
व्यामोहेन वहिश्चरो व्यतनवं भूर्येव वित्तव्ययम्।
ये वा प्रीतिपुरस्सरं धनमदुः म्लानाननास्तेऽधुना
नित्यं स्मेरमुख ! प्रमोचय ऋणात् वागीश पाहि प्रभो॥ **14** ॥

कालो मोहसहोदरः ग्रसति मे शक्तिं मतिं शोभनां
भक्तिघ्नी विपरीतसंशयभरा बुद्धिर्मदीया स्थिरा।
खानि स्वेच्छविहारशक्तिरहितान्यात्मापहारीण्यहो
देव ! त्वं करुणानिरीक्षणबलात् वागीश पाहि द्रुतम्॥ **15** ॥

ख्यातिं नैव ददासि साधुसमितौ विद्वद्गणे हृष्यति
भूतिं त्वद्विभवप्रचारकरणे रात्रिं दिवं जाग्रति।
शक्तिं दिक्षु सुघोषणाय यशसो वेदान्तसूरेस्सदा
किं वा ते मयि कोपमूलमव मां श्रीवाजिवक्त्र प्रभो॥ **16** ॥

धन्योऽहं हरिसेवया नियतया संवित्तिसंभिन्नया
काम्याभोगविदूरया मधुरया सञ्जीवनीरूपया।
आलोकेन समर्पणेन वचसां विज्ञापनेनादरात्
पानेनातुलगन्धकृष्णतुलसीधृत्या शुभाशंसनात्॥ **17** ॥

लीयन्तं बहुपातकानि तरसा त्वन्नाम्नि सङ्कीर्तिते
    जायन्ते कलिदोषवेगवशतो भूयोऽपि नश्यन्ति च।
उत्पत्तिस्थितिनाशतो बहुतरं पापावृतो मादृशो
    हे वागीश विधत्स्व पापनिचयं निर्लिप्तमस्मिन् जने॥ **18**॥

शुष्कं व्यर्थं उदीरयामि वचनं सर्वत्र मोहादिना
    प्रायस्तत् कलहप्रदं च विफलं कालं नयाम्यद्भुतम्।
मात्सर्येण बुधा मितंपचजनास्सारानभिज्ञास्सदा
    कष्टं मोचय वागधीश कृपया वाचाटतादोषतः॥ **19**॥

मामत्यद्भुतवाजिकन्धर विभो दीनं दृशा स्वच्छया
    कल्याणाकर कल्पकामरतरो तूर्णं मुदा लोकय।
देव्यालिङ्गननित्यतृप्तिविकसत्पद्मेक्षण त्वं क्षणात्
    दृक्दोषं तिमिरं विदूरय कृपावेगेन सन्धुक्षितः॥ **20**॥

मग्नं संसृतिकर्दमे गजमिव ग्राहेण कृष्टं दृढं
    लग्नं भीषणकाममोहनिविडे जाते द्विजं दुर्गतम्।
आशापाशपिशाचभूतनिवहाविष्टं यथा बालकं
    दुर्वारश्रमदुःखितं हयमुख ! त्रायस्व मां सेवकम्॥ **21**॥

कर्माण्यद्भुतशक्तिमन्ति बहुधा कर्षन्ति घर्षन्ति च
    प्रायः प्राज्ञगणोऽपि हातुमवशो दुःखाकरोत्यन्ततः।
वैदुष्यं धनसञ्चयः कुलमहत्ता धीरता वश्यता
    नालं कर्मविमोचनाय चरणौ वागीश ते संश्रये॥ **22**॥

नैश्चिन्त्यं निरपायसेवनधनं निर्वाह आशागणाः
    नैपुण्यं निरयादिदूरवसतिः नेतृत्वमास्था धृतिः।
निर्णीतिः निखिलार्थनीतिनिरतिः नानाथताऽनामयो
    नूनं सैन्धवकन्धरस्य महसः सेवाफलं निश्चितम्॥ **23**॥

त्वत्पादाश्रयणं वदन्ति विबुधास्संसारसन्तारकं
सारं सारतरं सदा सुमनसां सारोत्तमं साधनम्।
साध्यं साध्यगणैस्समाधिनियतैश्शिष्टैरथाङ्गीकृतं
योगक्षेमवहौ हयास्य ! चरणौ विन्दाभि ते सन्ततम्॥ 24॥

त्वत्कार्यं मधुसूदनं तव तनुर्माध्वी तथा भारती
प्राज्ञास्त्वां मधुसूदनं श्रुतिवशादाम्रेडयन्त्यादरात्।
मान्यं मानसमन्वहं मधुमयं मावासवक्षः पदं
वृत्तिं कल्पय साधु मे मधुमयीं वागीश मध्वाशय !॥ 25॥

पीतं वानरपुङ्गवैर्मधुवनं विध्वंसितं तावकैः
धृत्या दानवपुङ्गवो मधुरपि त्वल्लीलया नाशितः।
मध्वानन्दसुखानुभूतिविमुखाः प्राज्ञा मधुं भुञ्जते
तं त्वेहे मधुमत्तया कलयितुं वागीश मे जिह्वया॥ 26॥

अश्वो मेध्यमृगो जवस्य विदितः सेनाग्रगण्यस्सदा
हेषा पञ्चजनोद्भवस्य सदृशो यस्य ध्वनिर्वीरहा।
धीरो धीरनिषेवितः तव शिरोऽश्वस्याभवत् भाग्यतः
त्वं वेगेन सुहेषया सपदि मां संरक्ष वागीश्वर॥ 27॥

बुद्धिस्ते दयिता स्मृतिस्सहचरी ख्याता श्रुतिस्सोदरी
दिव्या सा प्रतिभा सुता प्रियसखी मेधा धृतिस्ते स्नुषा।
भूतिस्स्या परमानुभूतिनिचयः सद्वासना बान्धवाः
आभिस्संयुत वागधीश भगवन् मां संसृतेस्तारय॥ 28॥

मन्त्रं साधु जपेत् सदैव मनुजो भक्त्या नियत्या भुवि
श्रद्धावान् स्वरवर्ण दोषरहितः हित्वान्यपर्यं भिया।
सिद्धिं विन्दति धीर एव भवति श्रीमान् स विद्यातते
दुर्गं मन्त्रमहं विहाय चरणौ ते संश्रये वाग्विभो॥ 29॥

सर्वाभीष्टफलप्रदाननिरतः श्रीमान् दयावारिधिः
योगक्षेमवहस्सदा पदयुगे युक्तात्मनां अर्चताम्।
साधूनां अभिरक्षणाय बहुधा दिव्यावतारान् वहन्
देवो वाजिमुखः स्थितं पदयुगे जागर्तु मां रक्षतु ॥ **30** ॥

दिव्यापाङ्गविशेषतस्त्रिभुवनं ते निर्वृतं सर्वतः
दिव्यं चक्षुरितीरितः सुमनसां त्वं दृश्यसे शाश्वतम्।
चक्षुस्ते प्रददामि दिव्यमधुना पश्य त्वमित्युक्तवान्
हे चक्षुःप्रद ! दृष्टिमद्य कृपया देहि स्थिरां मे प्रभो ॥ **31** ॥

वेदान्ताध्वसु शुद्धभक्तसरणौ ज्ञानक्रियामार्गयोः
दृष्टिर्न प्रसरत्यहो कथमपि स्वल्पापि मन्दस्य मे।
वाढं मास्तु सुतीक्ष्ण दृष्टिरधुना स्थूलापि लोकायता
मन्दीभावं उपैति हन्त भगवन् दृष्टिं स्थिरां देहि मे ॥ **32** ॥

ज्ञानं सर्वसुखप्रसारसुभगं यस्यास्ति स भ्राजते
तत् ज्ञानं यदि लोकमात्रनिरतं ख्यात्यादिदं केवलम्।
विज्ञानेन पदं प्रयान्ति यतयस्ते शुद्धसत्त्वाः स्थिरं
ज्ञानानन्दमयं हयास्यमधुना देवं प्रपद्ये ततः ॥ **33** ॥

विज्ञानं मतिविभ्रमाय जनताक्षोभाय संपद्यते
लोके पण्डितपामरस्मयकरं वेदान्तधिक्कारकम्।
येनास्मिन् समये मितंपचतया मुह्यन्ति सर्वे जनाः
जल्पन्त्यज्ञजने हयास्य कृपया नैवास्मि ते वञ्चितः ॥ **34** ॥

वर्णस्ते विविधो युगानुगुणतो विद्वद्भिराशंसितः
केचित्त्वां प्रणयप्रकृष्टमनसा पृच्छन्ति वर्णं मुदा।
इच्छातस्त्वमनन्तवर्ण इतिचेत् भक्तः प्रहृष्टो भवेत्
त्वं शुद्धस्फटिकाम एव भगवन् विभ्राजसे सर्वदा ॥ **35** ॥

वेदात्मा विनतासुतः स्वयमदात् त्वन्मन्त्रवर्णक्रमं
तेन त्वं श्रुतिशेखरार्यगुरुणा भक्त्या मुदास्तूयत।
मन्त्रं वा विनतार्भकं गुरुवरं जानामि नो देशिकं
तस्य श्रीचरणारविन्दयुगलं ध्यायामि संरक्ष माम्॥ 36॥

हे वागीश ! भवत्प्रभावमखिलं विद्याधरा जानते
नान्ये किं पुरुषास्तथैव मनुजाः किं वानराः पन्नगाः।
नूनं कापथगा भवन्ति कुजना ये भक्तिहीनस्त्वयि
क्षेमायाहम् अनन्तदैववशतः त्वां भावयेऽहर्निशम्॥ 37॥

बुद्धिर्मे नहि धावति स्थिरतरा कुत्रापि दैवान्तरे
येनाहं श्रुतिशेखरार्यचरणांभोजेन कृष्टस्सदा।
तेन त्वत्पदपङ्कजीयमधुना पीतेन कामं सुखी
तिक्ताम्लादिरसो हयास्य रुचये कल्पेत कस्मा अपि॥ 38॥

वित्तानां व्ययतः श्रमेण बहुना साध्येऽश्वमेधादिके
यावज्जीवं अतन्द्रितेन विधिना कार्येऽग्निहोत्रादिके।
सर्वेषूपरतेषुकर्मनिचयात् भ्रष्टेषु भीत्या द्विजे
आश्वास्यौ चरणौ भजामि शरणं विश्वस्य चाश्वस्यते॥ 39॥

व्यर्थालाप कथाशतादिनिहता जिह्वा तथा मे श्रुती
लग्ने गाढं अपार्थ दुर्वचवचो गुंफश्रुतौ सन्ततम्।
पादौ स्वेच्छगती करौ च भवतः सेवातिरिक्तादरौ
कल्याणं कथं अप्नुयां करुणया वीक्षस्व वागीश्वर॥ 40॥

आशा मे महती धनार्जनविधौ सत्ख्यातिसंपादने
सौधारामसुदीर्घिकादिरचने विद्धज्जनानन्दने।
ग्रन्थानां अनुशीलने च रचने नास्ति प्रवृत्तिः स्वतः
त्वत्पादद्वयसेवयैव दिवसान् युक्तान् निनीषाम्यदम्॥ 41॥

वेदोऽनन्त इतीर्यते स्मृतिरपि स्मर्तुर्बहुत्वात्तथा
शिष्टाचारविधापि कालगुणतो देशाच्च नानाविधा।
त्रिष्वेतेष्वभिमानमूलगतिषु स्वच्छन्दनीतेषु चेत्
पन्थानं कमुपाश्रयेव भवतः सेवां विना शाश्वतीम्॥ **42** ॥

आनन्त्यं गुणकर्मजन्मगतिषु श्रेष्ठाभिधानेष्वपि
ज्ञातं नाम वहन्ननन्त इति च त्वं भ्राजसे सर्वदा।
नान्तोऽस्तीति पुरा त्वयैव विवृतं शेषोऽप्यनन्तोऽभवत्
पापानन्त्यवहे हयास्य करुणानन्त्यं विधत्स्वादरात्॥ **43** ॥

सत्यं ज्ञानं अनन्तमद्भुतसुखं ब्रह्मामलं शाश्वतं
यो वेदात्मनि सुस्थितं हयमुखं देवं विपश्चित्तमः।
सर्वान् तेन सहैव कामनिवहान् आप्नोति दिव्यानिति
ज्ञात्वानन्तसुखाय साधु कलये मन्मानसेनाधुना॥ **44** ॥

स्वाच्छन्द्येऽपि परावरत्वविभवे सर्वज्ञतायामपि
स्रष्टृत्वेऽपि समस्तसूरिनिवहेड्यत्वेऽपि साम्येऽपि वा।
सर्वत्राप्रतिरुद्धशासनरतेऽप्यत्यादरात् पुस्तकं
धृत्वा वेदयसि प्रमाणशरणैर्भाव्यं हयास्येति किम्॥ **45** ॥

न्यायं तत्क्रतुमामनन्ति विबुधा यो यत्क्रतुर्मानवः
स प्रेत्यापि तथैव मुक्तिविषये यद्वा यथा वा भवेत्।
श्रीमान् वेदशिरोगुरुः तव करौ साक्षात्करोति स्म यः
स्वीयं हस्त युगं तथैव धृतवान् अत्रैव नो रक्षितुम्॥ **46** ॥

नाहं शास्त्रगणानवैमि हृदयं तेषां च सारक्रमं
यद्वा पण्डित मण्डलीयविविधाचारान् विवेक्तुंक्षमः।
अद्धा मानसभावरक्षणविधौ संभावना नास्ति मे
चेष्टां कामपि वापलेन तनवै तुष्ट्यै हयास्य प्रभो॥ **47** ॥

गायत्र्या बहुलक्षवार कृतया मन्त्रान्तराणां जपात्
प्राणायामशतेन दिव्यवचसां आम्रेडनेनानिशम्।
श्रीमद्भागवतादिसूनृतगिरां आवृत्तिभिस्सूक्तिभिः
त्वामाराधयितुं प्रभुर्न चरणारश्वास्य ते संश्रये॥ **48** ॥

हंसारूढविधातृबोधनपरव्याख्यानमुद्राकरः
वेदन्तद्वयपारदृक्परमहंसाद्येड्यपादांबुजः।
श्रीमन्मानसराजहंसविपुलश्रीरस्तु मन्मानसे
वागीशस्तुरगाननः स्फटिकभूभृत्सत्ववर्णः सदा॥ **49** ॥

कल्याणं तुरगाननः कलयतात् आनन्दवल्लीयुतः
योगक्षेमवहस्समस्तजगतां योगाय मे कल्पताम्।
भक्तिज्ञानविरागतादिसुगुणास्तोमं विधत्तां सदा
सेवासंपदमद्भुतां दिशतु मे दैवीं मुदा शाश्वतीम्॥ **50** ॥

इत्थं श्रीनिधिराघवोऽत्रिकुलजो वागीशसेवारतः
तद्वत्तेन दृशा निरन्तरतया संसेवमानो मुदा।
दृष्टिं प्राप्य पुनः प्रकाशितमतिः पादारविन्दे स्तुतिं
दिव्यामर्पयति प्रियेण पठतां संपद्यतां मङ्गलम्॥ **51** ॥

॥ इति श्रीहयवदनपञ्चाशत् समाप्ता॥